# Shri Mahalakshmi Stotram

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : Shri Mahalakshmi Stotram

File name : mahAlakShmIstotram.itx

Category : devii, devI, lakShmI, shrIdharasvAmI

Location : doc_devii

Author : Shridharaswami

Transliterated by : Prakash Ketkar

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્

સર્વસૌભાગ્યરૂપા ત્વં સર્વસમ્પત્સ્વરૂપિણી ।
સર્વકલ્યાણરૂપા ત્વં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૧॥

જનશ્રીસ્ત્વં વનશ્રીસ્ત્વં મઙ્ગલશ્રીઃ સ્વભાવતઃ ।
બ્રહ્મશ્રીશ્ચ મોક્ષશ્રીશ્ચ મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૨॥

શાન્તિસ્તુષ્ટિસ્તથાપુષ્ટિર્મેધા કીર્તિશ્ચ સન્મતિઃ ।
દૈવીસમ્પત્સ્વરૂપા ત્વં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૩॥

મોક્ષસાધનસમ્પત્તિરાયુરારોગ્યસંસૃતિઃ ।
સર્વૈશ્વર્યસ્વરૂપા ત્વં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૪॥

ભક્તિયોગા બ્રહ્મનિષ્ઠાત્વમેવૈકાખિલેશ્વરી ।
તદૈવ બ્રહ્મરૂપા ચ મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૫॥

સચ્ચિદાનન્દરૂપા ત્વં જગન્માતા જગત્પિતા ।
વિષ્ણુબ્રહ્મમહેશાસ્ત્વં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૬॥

યતો હિ જાયતે વિશ્વં યતશ્ચ પરિપાલ્યતે ।
યસ્મિન્ સંલીયતે હ્યન્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૭॥

યચ્ચ કિઞ્ચિત્ સુષ્ઠુજાતં યચ્ચ કિઞ્ચિત્ શુભં સુખમ્ ।
તદેવૈકાત્મરૂપેણ મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૮॥

વેદસ્મૃતિઃ સદાચાર આત્મતુષ્ટિર્ગુરોઃ કૃપા ।
સર્વોપાસ્યસ્વરૂપા ત્વં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૯॥

વશમેવાદ્વયં બ્રહ્મ નિત્યાનન્દૈકમાત્રતઃ ।
ભેદબુદ્ધિમપાસ્યૈવં મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૧૦॥

ઇતિ શ્રી શ્રીધરસ્વામીવિરચિતં મહાલક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ ॥

શરન્નવરાત્રિ, રચનાસ્થાનમ્ શ્રીક્ષેત્ર વરદપુર, સંવત્સર ૧૯૭૨

શ્રી શ્રીગળવર કોનેય એકાન્તદલ્લિ

---

*Shri Mahalakshmi Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*